# अष्टमः पाठः

CECC3H

## शङ्कराचार्यः



केरलराज्यस्य पूर्णानदीतीरे एकः ग्रामः। ग्रामस्य नाम 'कालडी' अस्ति। 788 तमे वर्षे शङ्कराचार्यस्य जन्म अभवत्। अस्य पितुः नाम 'शिवगुरु' मातुः नाम 'आर्याम्बा' च आसीत्। शङ्करस्य बाल्यकाले एव शिवगुरु' दिवंगतः। अतः आर्याम्बा एव शङ्करस्य पालनम् अकरोत्। बाल्यकालात् एव सः अतीव प्रतिभासम्पन्नः आसीत्।एकदा शङ्करः स्नानाय नदीं प्राविशत्। तत्र एकः मकरः तं गृहीतवान्। सः उच्चैः आक्रोशत्। माता तत् श्रुत्वा नदीतटम् आगच्छत्। तदा शंकरः मातरम् अवदत्- "अम्ब! संन्यासग्रहणाय मह्यम् अनुमतिं देहि। तदा एव अहं मकरात् मुक्तः भविष्यामि।" आर्याम्बा शङ्करस्य संन्यासं न इच्छति स्म। किन्तु पुत्रस्य कष्टं दृष्टवा "यथा तुभ्यं रोचते तथा कुरु" इति अवदत्। सद्यः एव शङ्करः मकरात् मुक्तः अभवत्। संन्यासाय अनुमतिं लब्ध्वा शङ्कर गृहात् निरगच्छत्। अष्टवर्षीयः सः ओंकारेश्वरक्षेत्रे आचार्यगोविन्दपादात् ज्ञानं प्राप्तवान्। द्वादशवर्षीयः शङ्करः सम्पूर्णदेशस्य पर्यटनं कृत्वा काशीं प्राप्तवान्। षोडशवर्षे सः बह्मसूत्रस्य भाष्यं लिखितवान्।



आदिशङ्कर विविधानि मधुराणि स्तोत्रकाव्यानि अपि रचितवान्। अकरोत्। सः धर्मरक्षार्थं देशस्य चतुर्दिक्षु चतुरः मठान्सं स्थापितवान्। केवलं द्वात्रिंशे एव वयसि शङ्कराचार्यः ब्रह्मभावम् उपगतः। आदिशङ्कराचार्यः भारतवर्षस्य ऐक्यसाधने किञ्च सनातनधर्मस्य प्रतिष्ठायां सर्वदा स्मरणीयः विद्यते।

शब्दार्थः

**दिवंगतः** = मृत्यु हो गयी **पूर्णानदी तीरे** =पूर्णनदी के तट पर **प्राविशत** =प्रवेश किए **आक्रोशत्**= चिल्लाये **श्रुत्वा** =सुनकर **सद्यः**= तुरन्त, शीघ्र **लब्ध्वा** = प्राप्त करके **प्राप्तवान्** = प्राप्त किये **निरगच्छत्** = निकल गए **संस्थापितवान्** = संस्थापित किये **द्वात्रिंशे वयसि** = बत्तीसवें वर्ष में ।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

आदिशङ्कराचार्यः, आर्याम्बा, पूर्णानदीतीरे, उपनिषदादिभाष्याणि,आक्रोशत्, ओंकारेश्वरक्षेत्र, स्तोत्रकाव्यानि, बाल्यकालात्।

**2. यथायोग्यं योजयत-**

यथा- मातरम् अलिखत्

भाष्यम्   अगच्छत्

ज्ञानम्   अकरोत्

प्रचारम्   अलभत्

जन्म प्राप्नोत्

नदीम् अवदत्

**3. एकपदेन उत्तरत-**

यथा- कालडीग्रामः कस्मिन् राज्ये अस्ति ? केरलराज्ये

(क) शङ्करस्य पिता कदा दिवंगतः ? .........................

(ग) माता पुत्रं केन गृहीतम् अपश्यत् ? ..........................

(घ) शङ्करः कस्य पर्यटनं कृत्वा काशीं प्राप्तवान् ? .........................

(ड.) सम्पूर्णभारतवर्षे शड़्करः कस्य प्रचारम् अकरोत् ? ...........................

**4. सन्धि-विच्छेदं कुरुत-**

पदम् सन्धि-विच्छेदः

यथा- शङ्कराचार्यः =शङ्कर + आचार्यः

सर्वोदयः ...................................

ओंकारेश्वरम् .................................

**5.वाक्यानि रचयत-**

पूर्णानदीतीरे,

शङ्करस्य,

सन्यासाय,

धर्मरक्षार्थम्,

**6. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

यथा- शङ्करस्य पितुः शिवगुरुः आसीत्। शङ्करस्य पितुः कः आसीत् ?

(क) आचार्यशङ्करः बाल्यकालादेव प्रतिभासम्पन्नः आसीत्।

(ख) मातुः अनुमतिं लब्ध्वा शङ्करः गृहात् निरगच्छत्।

(ग) धर्मरक्षार्थं देशस्य चतुर्दिक्षु चतुरः मठान् संस्थापितवान्।।

**7. अधोलिखितानि वाक्यानि घटनाक्रमेण पुस्तिकायां लिखत-**

(क) द्वादशवर्षीयः शङ्करः सम्पूर्णदेशस्य पर्यटनं कृत्वा काशीं प्राप्तवान्।

(ख) केवलं द्वात्रिंशे एव वयसि शङ्कराचार्यः ब्रह्मभावम् उपगतः।

(ग) 788 तमे वर्ष शङ्कराचार्यस्य जन्म अभवत्।

(घ) अष्टवर्षीयः सः ओंकारेश्वरक्षेत्रे आचार्यगोविन्दपादात् ज्ञानं प्राप्तवान्।

**शिक्षण-सङ्केतः-** कस्यापि महापुरुषस्य जीवनचरितं दशवाक्येषु लेखयत

**एतदपि जानीत-**

- भारतीयसंस्कृतौ चत्वारः आश्रमाः-

1. ब्रह्मचर्याश्रमः।

2. गृहस्थाश्रमः।

3. वानप्रस्थाश्रमः।

4. संन्यासाश्रमः।

**स्मरणीयम्-**शङ्कराचार्यः चतुरः मठान् संस्थापयत्। एते मठाः-

- दिशा स्थानम् मठः
- पूर्व जगन्नाथपुरी गोवर्धनमठः
- पश्चिम द्वारिका शारदामठः
- उत्तर बद्रीनाथः ज्योतिर्मठः
- दक्षिण रामेश्वरम् श्रृंगेरीमठः

**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।**